श्रीलोकभास्कररस्येदंसमूलोदाहरणस्यप्रारंभः पत्र ४१

२१०११४

Acc. NO. ~~1704~~ M.1680
Title - लोक भास्कर
Author - लोकनाथ.
Date - शके 1724
Subject - Astronomy.
folio - 41
Xerox - 80

1

को॰भा॰

श्रीवरदमूर्तयेनमः ॥ श्रीमन्नंदसुरार्चितं भगवतः पादारविंदद्वयं पूर्णंचंद्रकचंद्रिकान
खरुचि ध्यात्वाब्धि विध्वंसिनी ध्यात्वा इत्यद्विवाद्विवाक गणपान्देवाश्च सिद्धांततो व
क्षे हं खलु लोकभास्करमिदं श्रीलोकनाथः सुधीः ॥१॥ शिष्टाचारान्मंगलं कुर्वाण एवं नि
ष्प्रावधानार्थं विषयसंबंधप्रयोजनान्याह ॥ लोके भास्करइवज्योतिःशास्त्रे प्रकाशयती
ति तथा एतेन प्रयोजनं दर्शितं सिद्धांततः उद्धृत्यपेक्ष्येत्यनेन स्वसिद्धांतज्ञानादर्शित वि
षयश्च एवं भगवतः पादारविंदं देवांश्च ध्यात्वा लोके भास्करं वक्ष्ये इत्यन्वयः ॥ संवत्सरं नि
संवत्सरः पंचगुणेंदु १३५ हीन शाकः सपंचांकमनू १४९५ निनीत्र ॥ शास्त्राब्दकः सो
नगर्तुवेदैः ४६२४ युक्तः कलेः स्युर्गणगताः स्यात् ॥२॥ टीका ॥ वर्तमानसंवत्सरः पंचगु
णेंदुभिः १३५ हीनः शेषांकः शालिवाहनशको भवति ॥ स शाकः पंचांकमनुभिः १४९५ ॥

लो॰ प्र॰

हीनः अत्रास्मिन्ग्रंथे शास्त्राब्दो भवति शकशालिवाहनाब्दः अब्धिनगर्तुवेदैः ४६७४ सहितः कलेः गताब्दगणो भवति अत्रोदाहरणं वर्त्तमानसंवत्सरोयं १६७५ सपंचगुणेंदुभिर्हीनः शेषांकः १५०० शालिवाहनीयशकोजातः अयं शकः १५०० पंचांकमनुभिः १०९५ हीनः शेषांकः ५ शास्त्राब्दोजातः ५ अब्धिनगर्तुवेदैः ४६७४ सहितः कार्यः ४६७९ सकलियुगस्यगताब्दगणोजातः ॥ अथशुद्ध्यानयनमाह ॥ शास्त्राब्दपिंड ऋषिपूर्णेनुभोम्दगांकैः १००७ गुण्यः पुनर्मनुगुणाब्धभचक्रलब्ध्या ॥ पुन्नेः खखबाहु ८०० विहृतो नगशेषवारास्त्रोराब्दपास्युरितरस्तुहि शुद्धिसंज्ञः ॥ अत्रोदाहरणं शास्त्राब्दपिंडः ५ ऋषिपूर्णनभोम्दगांकैः १००७ गुणितंजातं ५०३५ पुनः शाब्दोयं ५ शास्त्राब्दः मनुभिः १४ गुणितेजातं ७० भचक्रेण २७०० तोयं ० १सप्रथमांकैर्युक्तोजातः ५०३५ १ अस्मात्खखबा

रसपन्नै ४

२

एभिः ८०० विहृते लब्धं ६ समस्तेषां येनोरस्यादितः शुक्रः सौराब्दो जातः अपरः शेषां
कः २३५ १ शुद्धिसंज्ञो जातः ३ सौराब्दादहर्गणानयनमाह अथ सौराब्धितर्कदहने
३६४ गुणितः स्वरवाष्ट ८०० लब्धायुतो दिनगणो रविहायनानां कल्प्यपि वर्षविवरो
भगणप्रमाणः सूर्येन्दयै १६ ६ रहितो हि मध्यः ४ अथोदाहरणं शास्त्राब्दः ५ अ
ब्धि तर्कदहने ३६४ गुणिते जाते १८२० खरवाष्ट ८०० लब्धे युतो जातः ६ १८२२ अयं च
सौरवर्षाणां महर्गणो जातः वर्षविरतौ भगणप्रमाणः ३७०० मेषादि भेस्थः सूर्यः सदा
स्यात् मध्यमरवुन्दपैः ६ ३१८२ रसपलैः ६ रहितः भगणप्रमाणः स्यात् २६८२ ५४ चंद्रो
च्चयोर्भुवानयनमाह साईन अब्दः सहस्त्रगुणितः १००० खजिनो रावोनो ग्रस्ता ब्धि
भी १८२२ रसयमै २६ रहितो हिमांशुः अब्दाः खवरवं गु ६०० लवयुक्तथवर्षवृंदः पंचा

२

बरत्रि ३०५ गुणितो ८ गजां ८ स्तायुक्तः ५ त्रिघ्नाब्द षोडशाशातांशा १६०० समन्वितश्च तर्का-
ग्निभास्कर १२३६ युतश्चं भवेद्विधूच्चं उदाहरणं शास्त्राब्दः ५ सहस्र १००० गुणित : ५०००
कार्यः अयं चखखखजिनांशाकेन २४० पुनः कार्यः ४९२९ २० पुनः द्व्यष्टाब्धिभीरसयमैः ४८२
२६ क्षेपको रहितोयं ४४९६ ४४ हिमांशुच्चं द्वभ्रपकोजातः अब्दाः ५ खखखर्तु ६०० लवः ० ०
शासः तेनयुक्तोजातः ४४९६ ४४ से भचक्रेः ३७०० शेषः भगणशेषांकेमनं ७९६ ४४ सचं-
द्रभ्रंशोजातः अथ वर्षवृंदः ५ पंचांबरत्रिः ३०५ गुणित : गुणितेजातं १५२५ अब्दः ५ गजांशो-
यं ० ३७ तेनयुक्तोजातः १५२५ ३७ पुनस्तारत्राब्दः ५ त्रिघ्नः कार्यः १५ षोडशांशातेनभागोहार्यः
० ० तेनयुक्तोजातः १५२५ ३७ युतः तर्काग्निभास्करैः १२३६ युक्तः युक्तेजातं ७६१ ३७ भच-
क्रशेषः भचक्रशेषांयं ६१ ७ विधूच्चं चंद्रोच्चं जातं पातः शरेंद्र १८५ गुणित त्रि २ गुणाब्द

नं १

द्विंशा २० भागैर्युतोऽब्दगणतोऽष्टशतां ८०० शहीनः ई तर्काश्वितर्करहितः खखभास ३०० शेषा भौमादयो ध्रुतिशतेरववशेषिताःस्युः उदाहरणं पातः शास्त्राब्दः ५ शरेंदु १४५ गुणितः ७२५ विगुणाब्दः १५ अस्य विंशांसो २० भागेन ० ४५ युक्तः युक्ते जातं ७२५ ४५ पुनः अब्दगणः ५ अष्टशतांशो ८०० नानेन ० ० हीनः ७२५ ४५ स एतद्वेतर्काश्वितर्कैः ६२६ क्षेपरहितः शेषः ९९ ४५ पातध्रुवो ज्ञातः एते सूर्योदयः खखभास ३०० शेषाः कार्याः वक्ष्यमाणः २२६० भौमादयो ध्रुतिशतेः १८०० शेषितव्याकार्या तेषां मध्यानां नवशत ९०० मितभगणत्वात् भौमोऽब्दको नगशरांक ९५७ गुणः शराश्वैर्युक्तश्चतुर्गुणरसमात्रिशतांदा युक्तः ७ सौऽब्ययुगोडुगुणितो नवसंगुणाब्दखवा ब्ध्यंशाके नखबाहु २२० मितैश्च हीनः उदाहरणं अब्दः ५ एतैर्गुणितः ९५७ गुणिते जाते ७८५ पुनः शराश्वैः ७५ युक्तो जातः

लो॰भा॰ युक्तोजातः ४८६० शास्त्राब्दः ५ चतुर्गुणः २० त्रिशतांशेन भागमपहृत्यावाप्तं० ० तेन युक्तो
जातं ४८६० ४ अष्टादशशतेन १८०० शोषितः शेषांकोयं १२६० ४ भौमध्रुवोजातः अथ
बुधध्रुवानयननाह शीघ्रमिति शास्त्राब्दः ५ युगेन्दु ३ ४ भिर्गुणितः १३७० नवभिर्गु
णितः शास्त्राब्दः ४५ अस्य खवाब्धि ४० भागे: नखबाहुमितैश्च २२० क्षेपकेर्हीनः ११४८ ५३
शीघ्रस्यात् अथजीवः जीवोवियत्तिथि १५० गुणोब्दः खसूर्य १२० भागेः सप्तध्रुवदलवर्कैः
श्चयुतोगजेन्द्रोः ११८ ८ शास्त्राब्दः ५ वियत्तिथि १५० गुणितः ७५० शास्त्राब्दस्य ५ खसूर्य
१२० भागेः ० २ सप्तघ्राब्दस्य ३५ वेदभागेः ८ ४५ गजेन्द्रो ११८ श्च क्षेपकैरेतैस्त्रिभिर्युक्तो जीव
ध्रुवोभवति ७ ६ ४७ शुक्रोच्चकेरसदिवाकरचंद्र ११२६ निघ्नो व्योमाब्धिराम ३४० रहितोब्द
शतांशहीनः अब्दः ५ रसदिवाकरचंद्रैः ११२६ निघ्नः ५६३० व्योमाब्धिरामैः ३४० रहितः

अब्दशतांशेन ० २ हीनः भचक्र १८०० शेषः जातं शुक्रोच्चं १६८९ ५७ अब्दो गुणो विधुरसै ६१
विधुवेददिग्भिः १०४१ र्युक्तः शनिर्मुनिगुणाब्दशतांशकैश्च ६ अथोदाहरणं अब्दः ५ विधुर
सै ६१ र्गुणितः ३०५ विधुवेददिग्भिः १०४१ क्षेपकैर्युक्तः मुनिगुणाब्दशतांशकैश्च ० २१ युक्तः
शनिः स्यात् १३४६ २१ अथैषां मध्यमगतीराह ससब्यङ्कजिना ७ २३ ३० रवेः शशिगति
र्वीस्वं ककार १८ वायवः ४६ तुंगस्यांबर ० मभ्रपंच विकलाः ५० पातस्य सिद्धाः ० २४ कुजे द्वौ समा
प्य २ ३७ इंदुजस्य च नखाव स्वक्षिणी २० २८ वाक्पतेः खंतत्वं च ० २५ भृगोर्गजावसुमता
८ १ सौरेर्गतिः खंदश ० १० उदाहरणं सूर्यगतिः ७ २३ ३० चंद्रगतिः ९८ ४९ चंद्रोच्चगतिः
० ५० पातस्य ० २४ भौमस्य २ ३७ बुधस्य २० २८ गुरोः ० २५ भृगोः ८ १ शनेः ० १० पूर्वा
नीतारेते मध्यमपलागतयः मेषसंक्रांतिसमये जाताः मेषसंक्रांतिदिने औदयिकानाते

लो॰ नी॰

शुद्ध्यान भोगगतिसंगुणिता: खखवाष्ट ८०० भागो नितानितो क्रियखेर्दिन औदयिी वता: सूर्योक्ततोच्चविकला तस्मेव नास्ति चातुर्युगाब्दगणतोहि परिक्षणीया: ११ अथ गोमूत्रिकागुण नक्रम: एका मूर्ध्वरेषा तिर्यग्रेखाद्वयं दत्वा उपरिगतिकलातदध: शुद्धिकला: तदधस्त द्विकला पर भोगगतिविकलातदध: शुद्धिकलास्थाप्या: अथोर्ध्वांकेन अधोधस्था अंकागुणनीया: त थाच गतिविकलागुणितशुद्धिविकलांकेन षष्ठि भागेन गतिकला: गुणित: शुद्धिविकलांकोया ज्य: स च गतिविकलागुणितशुद्ध्यंकेन योज्य: तत्षष्ठि भागेन गतिकलागुणितशुद्ध्यंकेन योज्य: न त्राष्टशतेन यो भागोलब्ध: संस्कार्य औदयीन: अवशिष्टषष्ठिहृतलब्धाष्टशतल ब्धत द्विक रव्य: एव भोमादीनां भवंति सूर्योक्तत: सूर्यसिद्धांतात् अस्मिन्ग्रंथे सूर्यसिद्धांताद्विकला प्यंतरं नास्ति तच्चातुर्युगाद्ब्दगणत: आनीयं ते ग्रहा: परिक्षणीया: अत्रोदाहरणं प्र

र्वानीतमध्यानभोगते:संगुणनात्खखाष्ट८००लब्धभागेनिता:सचक्रियरवेर्दिनेमेषसं
क्रांतिदिनेऔदयिना:औदयिकास्यु:तद्यथा पूर्वानीतशुद्धि:२२५सूर्यगत्या ७ २३ ३०गु
णिता७३९खखाष्ट८००भक्ता२ १० चंद्रगत्यागुणिता:२३२२३ ३३भक्ता२९ २उच्चगत्या
गुणिता:१९५त्रो५० भक्ता० १४पातगत्यागुणिता:९४ ० भक्ता:० ७भौमगत्यागुणिता:
६ १४ भक्ता० ४६बुधगत्यागुणिता: ४८१० भक्ता६ १गुरुगत्यागुणिता९७ ५५ भक्ता० ७
शुक्रगत्यागुणिता१८८३ ५५ भक्ता२ ३१शनिगत्यागुणिता३९ १०भक्ता० ३पूर्वानीतयुता:
स्थाप्या:संस्कृतऔदयिक:सूर्य:२६०१ ४४चंद्र:७६७ ४२एवंचंद्रोच्चं६१ २३पात:९५
३८भौम:१२५९ १८बुधोच्चं११४२ ५२गुरु:७६ ४०शुक्रोच्चं१६७ ३६शनि:१३५६
१८चतुर्युगप्रमाणे सूर्यसिद्धांते सूर्याब्दसंख्याद्वित्रिसागरे:रयुताहते:४३२००००सं

लो॰ भा॰

ध्वांसं ध्वांतरास हितं वितेयं च चतुर्युगं कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया युगस्य दशमो
भागश्चतुस्त्रिद्व्येकसंगुणः इति तत्र एकस्मिन् सौर वर्षे सूर्यस्यैको भगणो भवति एतैर्वर्षैः ४३२
०००० एतावंतः सूर्यभगणाः जाताः अब्दाः सहस्रगुणित इत्यादिनायं ग्रंथेन द्वापष्टाधि भिरिति
क्षेपकं विना चंद्रस्य एते भगणाः जाताः चंद्रस्य एकवर्षे त्रयोदश भगणाः स्तस्मात्सप्तविंशतिदा
त हता १५९३३३६ रविभगणे त्रयोदशगुणिते योजिताः सर्वत्र रविचतुष्टये ३७०० हृत भगणाः
सोमाद्धे ९८०० हृत भगणाः चतुर्युगेभ्यः एतावंतः १५९३३३६ योजिता ५७७५ भवंति तस्माच्च
तुर्युगाब्दाः ४३२०००० त्रयोदशगुणाः ५६१६०००० पूर्वानीतं चंद्रभगणेषु योजिता १५९३३३६
चंद्रभगणाः जाताः ५७७५३३३६ सूर्यसिद्धांतेपि इंदोरसाग्नी त्रिषुसप्तभूधरमार्गणाः अ
थवर्षवृंदः पंचांबरत्रिगुणित इत्यादिना तत्काण्ग्नि भास्कर द्वलिक्षेपकं विना चतुर्युगेभ्य आनी

६

ताश्चंद्रोच्चभगणाः ४८८२०३ जाताः तथैव सिद्धांते चंद्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा
युगे पातः शरघ्नइत्यादिना तर्काश्वितर्करामनत इति क्षेपकं विना चतुर्युगेभ्य आनीता एते भगणा
जाताः ११ २२२२३८ सूर्यसिद्धांतेच वामं पातस्य वस्वग्नियमाश्विशिखिदस्रकाः भौम
वक्रइत्यादिना वारश्वैर्मुकइइति क्षेपकं विना चतुर्युगेभ्य आनीता भौम भगणा जाताः २२९६८२
तथा च सिद्धांते दस्रत्र्यष्टरसांकाक्षिलोचनानि कुजस्य तु शीघ्रोच्चमित्यादिना नखवाणप्रे
नेगिति क्षेपकं विना चतुर्युगाब्देभ्य आनीता बुधोच्चभगणा जाताः १७९३७०६० एकस्मिन् वर्षे
बुधोच्चस्य तथा च चत्वारो भगणा भवंति तेन चतुर्गुणाश्चातुर्युगवर्षेभ्य आनीताः पूर्वानुबु
धोच्चभगणाः १६५७०६० युतास्तदा बुधोच्चभगणाः १७९३७०६० तथैव सिद्धांते बुधशी
घ्रस्य शून्यर्तुरवौद्धि त्र्यंकनगेंदवः जीवो गजेन्द्रो रिति क्षेपकं विना चतुर्युगवर्षेभ्य आनीता

६

12

लो॰भा॰

गुरुभगणा जाताः ३६४२२० सिद्धांतेपि ॰ रहस्यते: स्वदस्राग्निवेदषट्बाहवस्तथा
शुक्रोच्चकामिस्सादिनाव्योमाष्विरामरसिताइतिक्षेपकं विना चतुर्युगवर्षेभ्य आनीता: शुक्रो
च्चभगणा आनीता: ७०२२३७६ इति अथकस्मिन्वर्षे एको भगणो व्यतीतो भवति तेनैव गुणा:
चतुर्युगवर्षे युक्ता: ४३२०००० शुक्रोच्चभगणा जाता: ७०२२३७६ सिद्धांतेपि सित
शीघ्रस्य षट्सप्तत्रियमाश्व्यश्वभूधरा: अर्कोगुणो विधुरसैरिस्याद्दिनाद्यानो च विधु
वेददिग्भिरितिक्षेपकं विना चतुर्युगेभ्य आनीता: शनिभगणा जाता: १४६५६८ तथैव सि
द्धांते शनिर्भुजंगषट्पंचरसवेदनिशाकरा: ब्रह्मसिद्धांते च धनमाल वेदा४ष्टादस्र
ये भगणा कलमुच्चजीवशुक्रे पुपातबुधसौरिकुजे धनंस्वं ग्रंथांतरात्कलिगताब्दगणे
स्वगुण्याप्तिसिद्धैः शनोर्हितामितफलमत्रकार्यं कलिगताब्दगणे गुण्यात् वेदाष्टेति

चंद्रोच्चजीवशुक्रोच्चेषु क्रमेणवेदाष्टसूर्याभिस्वाद्दिनाभगणाश्च चतुर्युगे भगणेषु
नोधनंऋणं पातबुधोच्चशनेर्भगणेषु १ धनंतत्तुनोधनमाह क्रमेणवेदाष्टसूर्यगुणि
तेभ्यःकलिगताब्देभ्यः४६७९ क्रमेणवेदा४ष्ट८सूर्य१२गुणितेभ्यः सिद्धवातहते भागः
यल्लब्धं ७ ४७ चंद्रोच्चेऋणं पातेधनंतथा १५ ३५ जीवेऋणं बुधोच्चेधनंतथा २२ २१
शुक्रोच्चेऋणं शनौधनं इदानीभूमध्यरेखामाह रक्षोधानीदेवकन्याथकांचीश्वेतः
शैलःपर्यलीवत्सगुल्मा प्रोक्तावंतीगर्गराटं कुरोश्च क्षेत्रंमेरोःपार्थिवीमध्यरेखा १२
रेखादेशांतरयोजनैर्याणुलयारवेटानांगतिर्व्योमनागैः भक्ता लब्धाःप्राचिहीनोवि
लिप्ताःकार्याःसुक्तास्ता अथोपश्चिमायां १३ एतेदेशारेखामध्येतिष्ठंति अतोदेशो
ष्वेतेषुएकदेवसूर्योदयः तस्माद्रेखापूर्वपश्चिमदेशयोरेखायाअंतरायावंतियोजना

लो० भा०

नितन्मेतरं कैयहार्णगतिः पृथग्गुण्यातत्रैते ८० यो भागो लब्धः स च विकलासंलः रेखा
याः पूर्वदिशियेहीनाः पश्चिमे च युक्तः कार्यः उदाहरणं रक्षोधानीलंकादेवकन्यानगरिको
ची विद्युकाची शिवकाचीति दक्षिणे एवं पर्यलीवित्सगुल्मा इति द्वे नगर्यौ अवंतीउज्जयना

श्लो० ४

गर्गराटदेशः कुरुक्षेत्रं मेरुः सुमेरुश्च एतद्दक्षिणोत्तरायां पृथिव्यां मध्ये रेखायां स्थिताः एतेषु
एकैव सूर्योदयः १२ अन्यदेशेषु देशांतनयनमाह रेखेति रेखास्वस्यानदेशयोरंतरं ये
योजनास्थैः पूर्वोक्तायायहार्णगतयः सा पृथग्गुण्या व्योमनागैः ८० विभक्तो लब्धो विकलाये
हीनाः स्वदेशे रेखायाः प्राचि सति स्वदेशे रेखायाः पश्चिमे सति तावदेव विकलायुक्ताः तद्यथा
रेखास्वदेशानिकटस्थाउज्जयना स्वदेशो गढा अनयोरंतरं योजनाः २६ एतैः सूर्यगतिः
२४ गुणिता २६६ व्योमनागैः ८० विभक्तालब्धा विकला ३ सूर्यकरणं उज्जैनीतः गढानग

८

रेपसवति एवं चंद्रे ४४७ चं० पा० भौम० १ बु० ९ गु० ० शु० ३ श० ० ग्रो घनदे त्रांतरसं
स्कृतो रविध्रुवः २६०१ ४१ चं ५७ ६६ ५८ उच्च ५३ ३९ पात १७ २५ मं १२५६ ७ बुधै ११५८ ३१
ग्रस्पतिः ८६१ ५ शुक्रोच्च १६६४ २१ शनि १३६९ ६२ चन्द्रो भचक्रविहृतो अधिमासकाः स्युः
रवांका ९ ० सकाम धुभिताः स्तिथयो जनकैः चैत्रादयो अब्देकनवुडुहता १९ वरोषतक्या भृतु
१४ त्रि २ शिव ११ रवा ० ष्ट ८ नृपे १६ षु ५ सख्ये १५ प्रसगात्कल्पाद्गतो ग्रहध्रुवानयनमाह कु
मधुमाधवयोः प्रासावधिमासस्तु सोग्रिमः कदाचिदाश्विन श्चैत्र श्चाद्रसंक्रांतिवर्जितः १६
कलेरब्दगणात्साधाम धमाः क्षेपकं विना पादोन द्विदिनस्यास्युर्गत्या हीनाग्रहध्रुवाः उच्चे
शनित्रयं योज्यं पाते र्राशिराशयस्तथा १३५० १४ अवः सहस्रगुणितः इत्यादिनानीत चंद्रध्रु
वः ४४९६ ४४ अस्मात्भचक्रेणहृतेत्स्वधो धिमासाः ग्रंथसमयात्त्शेषः ७९६ ४४

८

लो॰भा॰

चंद्रध्रुवः अस्यापि रासदृशात्ताताधिकत्वादस्मिन्वर्षेप्यधिमासः ॥ तथा वा चंद्रध्रुवा भचक्रा
त्ता अधिमासस्तु शेषकः वेदरवाद्याधिको १७०४ यस्मिन्वर्षे स्यादधिमासकः ॥ तदा तावन्नवां
केन ९० हृतामाः १९ चैत्रशुक्लप्रतिपदातः वैशाखस्य कृष्णपंचमी तिथिर्ज्ञाता मेषसंक्रांतिदि
ने अवकेभ्यः नवेंदुहृताः १९ वशेषः ५ पंचैव जातः मनु १४ त्रि ३ शिव ११ खं ० अष्ट ८ नृप १६ इषु ५
संख्ये शेषक्रमेण चैत्रादयोधिमासाः प्रोक्तास्ततः पंचशेषे सति आश्वीनो मासस्तथा इति यत्
कदाचिदस्याग्रिमः कदाचिदस्य पश्चिमः सूर्यस्य मंदगतिजगतिवचनात् मधुश्चैत्रः १५ माधवो वैशा
खः अनयोरधिमासकत्वे मासे सत्यग्रिमो मासोधिमासः स्यात् चांद्रो मासः शुक्लपक्षप्रतिपदाद्य
मांतः स च यदि संक्रांतिरहितस्तदैवाधिमासः ॥ लक्षणं असंक्रांतिमासोधिमासः स्याद्द्विसंक्रां
तिः क्षयाख्यकः क्षयस्तु कार्तिकादौ स्यात्तदाद्व्यधिमासो ॥ क्वचित्सगोलगोभिः वर्षैः १९ क्वचि

९

त्र्यंद्रेंदुसंमिते॰ [illegible] ॥ त्रिंशाद्गुणा अजगतार्के

गता श्चमासा युक्ता दिनैर्गतक्रनूनितकोव्दपाद्यः अन्हां गणोहय ७ गुणो नखर २० नाडितालचं

द्रेषु ५१ भागरहितो ध्रुवसंयुतोर्के॰ १ उदाहरणं त्रिंशाद्गुणेति अजगतार्कदिधसादारभ्ययेे

गता॰ सावनमासास्ते त्रिंशाद्गुणा॰ यथा मेषसंक्रांतिगता दिवसा॰ वैशाखवद्य पंचमी दिने श्च

न्योऽहर्गण॰ अग्रिमदिनषष्ठीमारभ्यद्विनीया आश्वीनवद्य पंचमीपर्यंत षट्च मासा॰ त्रिंशाद्गु

णा जाता॰ १८० अये षष्ठीमारभ्यामावस्यापर्यंत दश दिनैर्युक्ता॰ १९० अयमेवार्क॰ षण्मासस्य

गतत्रिरक्तु निरूनो १८७ हर्गणो जात॰ अब्दप॰ शुक्रस्तदा दिनगणेनयापंचमगतषष्ठो बुधवास

र॰ अथ अहर्गण॰ १८७ हयै॰ ७ सप्तभिर्गुणित॰ १३०९ नखगुणितादहर्गणात् ३७४० चंद्रेषु ५१

भागेन ७३ २० सहित॰ १३८२ २० ध्रुवेन २९९१ ४१ च संयुतो मध्यमोर्को जात॰ ४३६४ १ अथ

९

लो॰ भा॰

चंद्रादिपाताद्यानयनमाह मध्यः शशीशत १०० गुणः स्वखनंद ९० भागैरहर्गणस्य तिथि भागमितैश्च हीनः चंद्रोच्चकं दश १० गुणा रवि भाजिताश्च पातश्च वेदगुणितो द्युगणो दशाप्तः २ उदाहरणं मध्यः शशीति अहर्गणः शत १०० गुणः १९७०० अयं स्वखनंद ९० भागै २१७ ४६ अहर्गणस्य तिथि १५ भागैः १२ २८ हीनः १९७९ ४६ ध्रुवेणानेन ९७ ६६ ५८ संयुतः २०२४६ ४४ भचक्र ७०० शेषो मध्यमश्चंद्रः १३४६ ४४ अहर्गणो दश १० गुणः १९७०० रवि भाजितः १५५ ५० ध्रुवा २२ २६ युता २०९ २६ चंद्रोच्चको जातः अहर्गणो वेद ४ गुणः ७४८ दश १० हृ ७४ ४८ ध्रुवा १७ २५ युतः पातो जातः १८२ १३ अथ भौमबुधजीवानयनमाह त्रिघ्नोऽष्टभागरहितो द्युखखवाञ्छि २०० भागैः ऊनः कुजो नख २० गुणः स्वगुणाग्नि वेदैः ४३ युक्तो बुधोच्च मथ वेद ४ गुणो दश १० सो जीवः स्वकीयरसबाहु २६

१०

विभागयुक्तः २ विधुर्द्युति अहर्गणः त्रि ३ घ्नः ५६१ स्वाष्टभागेन ७० ७ रहितः ४९० ५३ युगण
स्य रवरवाब्धि २०० भागेः ० ५६ ऊनः ४८९ ५७ ध्रुवा १२५९ ५७ युतो भौमोजातः ७७ ४२ १४
अहर्गणो नरव २० गुणः ३१ ४० स्वेषु ५ गाली वा ४ २ ऊनः ८९ ५८ युक्तः ३८२६ ध्रुवा ११५८ २९
सहितः ४९८५ २७ चक्र १८०० शेषः १३८५ २४ बुधोच्चं जातं अहर्गणः वेद ४ गुणः १४८८
त्यासः ७४ ४८ स्वकीयरसबाहु २६ विभागेन युक्तः ध्रुवा ८६११५ युतो गुरुर्जातः ९३० ४५ शुक्र
शनैश्चरयोरानयनं सूर्यादीनां परांश्चात भागे ८ गुणो दिन वियन्नव ९० भागयुक्ताः शुक्रोच्च
कं दिनरसा ६ द्राक एवसौरिः इंद्रो रदा १४ ३२ वियदिषु ५० नरवरा २० द्विबाहु २२ नागाः दस्र
रा ३२ श्च हि परो मिहिरो दृक्षानां ४ नागैरिति नागैः गुणः १७९६ अहर्गणस्य वियन्नव ९० भाग
न २ २४ युक्तः १४९८ ४ ध्रुवा १६६४ १० युतः ३१६२ १४ शुक्रोच्चं जातं भचक्र १८०० शेषेशु

उदाहरणं रवेः ५८० कुजस्य ६५१ बुधस्य ११०२ गुरोः ८५ शुक्रस्य ८०० शनेः ११९४ श्लोकं
६ केंद्रभुजानयनमाह उच्चयुक्तेनरहितंमृदुचलोच्चकेंद्रं स्तः केंद्रफलं क्रियतुलादिगतेधनर्णं
ऋणेन भुजस्त्र्यधिकमर्धविहीनकं राशयाधिकं भगणतः पतितो भुजः स्यात् ५ उदाहरणं उच्च
इति एतेमंदोच्चैमध्यमयुक्तेन रहितेमृदुशीघ्रकेमांदर्चौष्ट्यक्रमेणकेंद्रेस्तः तस्मिन्केंद्रेमेषा
दिगेसतिफलंमध्यग्रहेधनं तुलादिकेसतिफलंमंदरूणं त्रिराशेरूनकेंद्रएवभुजः स्यात्
त्रिराशयाधिकंनवराशिपर्यंतं अर्द्ध ६ विहीनंभुजः स्यात् तवेयंन्यत्रस्था त्रिराशयाधिकं
अर्द्ध ६ षड्राशेहीनं षड्राशेरधिकं अर्द्धषड्राशिनाविहीनं नवराशयाधिकंचेद्भगणतः
द्वादशराशिभ्यः शोधितोभुजः स्यात् उदाहरणं स्वयंदर्शयिष्यामः भुजज्यानयनमा
धफलानयनमाह छिद्रनेन रूपाश्विनो २१ विधुयुगा ४१ स्वरसा ६० नगाग ७७ छंकाः

६२ समुद्ररा१०४ रामद्विबा११२ अहीरगाः११८ खार्काः१२० भुजादिषुनगा७५ समिताश्च खंडाः स्युः चोषकोगतगतांतरके नेहन्यात् ८ बाणगा७५ भक्तं भुता भवतीहदोर्ज्या गुण्या परेण निजशरहृतेन हीना भक्ता शतेन १०० फलमत्र खगे धनर्णं मांदं दिवाकर विधू भवतः स्फुटौहि ६ उदाहरणं रूपाश्विनइतिहाभ्यां रविचंद्रभुजाइषुनगा७५ समिताः ऐतेनव रूपाश्विनद्रसादयः खंडाः स्युः खंडाग्रासत्रोषको को अयतो भोग्यः नतोभुक्तः नयोरंतरेण हन्यात् तस्यबाणगा७५ भक्तलब्धेन युताद्दोर्ज्यास्यात् उभयलेणरहतइत्यादिनामुदाहरणं सूर्यस्यमंदोच्चं ५८० मध्यमसूर्येण १३६४ १ रहितं १९१६ मंदकेंद्रं जातः ३६ त्रिराश्या ९७५ धिकं अर्द्धेन १३५० विलीनं भुजः ५६६ अस्मात् इषुनग ७५ सिमितासहमखंडाः ११२ त्रोषकः ४१ अयतः ११८ गत ११२ एतयोरंतरेण ५ गुणितः २०५ बाणगुणे भक्तलब्धे

फ ५

१२

न २ ४४ सप्तमः खंडः ११३ भुजः ११५ ४४ दोर्ज्याजातेयं ११५ ४५ रविपरेण १४ गुण्या: १६२० १६ निजखकीयरविभुजापराईहारेण ४० हृतेन ४० ३० हीनो १५७९ ४६ इयं द्वतेन १०० लब्धो १५ ४७ रवेर्मांदफलं जातं १५ ४७ खंडजो मध्यमे सूर्ये १२६४ तुलादिकेंद्रत्वादूने: जात: स्पष्ट: सूर्य: १३४८ १२ एवं चंद्रेऽपि मध्यमचंद्रः १२४६ ४६ उच्चं २०९ २६ केंद्रं १५६६२ ४० भुजः २१२ ४० ज्या ५६ ५२ फलं १८ ० इदं तुलादिकेंद्रत्वात् मध्यमचंद्रे ऋणं स्पष्टचंद्रः १२२८ ४६ अथ गत्यानयनमाह भोग्यं रवेर्द्विमुनि ७२ हृद्रविंद्र १२ हृच्चंद्र घ्नमिंदोः कुलादि द्विहृतं खयुगै ४० स्त्रिबाणैः ५३ खांगेषुभिः ५६० खमनुभिः १४० र्वियदब्धिनंदैः ९४० गत्यां धनर्णमपि कर्किमृगादिकेंद्रे १० उदाहरणं भोग्यमिति रवेः खंडकभोग्य ५ द्विमुनि ७२ हृतेन लब्धं ० ४ इदं कर्क्यादिकेंद्रत्वात् सूर्यस्य गत्यां १ २४ धनं १ २८ जाता सूर्यस्य स्पष्टा गति चंद्रस्य भोग्यखंडं १९ द्वार ५ घ्नं ९५ २

१२

लो॰ना॰

वि १२ हृत ७ ५५ इदं कर्कादिकेंद्रत्वात् चंद्रगस्पां ९८ ४९ धनं १०६ ४४ चंद्रगतिः स्पष्टेयं
कुजादिज्या भोग्यखंड खयुगे: ४० रित्यादिना लब्धं फलं कुजादीनां मध्यमगतौ कर्कादिकेंद्रे ध
नं मकरादिकेंद्रे ऋणम् राश्यंशाद्यानयनमाह अष्टघ्नषष्टि ६० विहृतांशाः खवाग्नि ३० राशि
स्सूर्यादिकेषु कुसुतादित्र्यो रामः ५ कांशा त्र्योशो दिवाकर १२ गुणाः कलिका विलिप्तास्त्रि ३ घ्नादि
२ भक्ता कुसुतादिषु ऋक्षकास्युः ११ उदाहरणं अष्टघ्नेति सूर्यादिषु रविचंद्रपातेषु अष्टघ्ना
८ षष्टिहृता अंशाः स्युः तेभ्यः खवाग्निभागेन राशिः स्यात् कुसुतादिषु त्र्यंशा ५ सा अंशाः
स्युः त्र्योशांशाः दिवाकर १२ गुणाः कलिका विलिप्ताः कला विकलिकाः स्युरित्यर्थः कुसुता
दयः पंचनक्षत्रगताः रविचंद्रवत् स्पः रविः १३४८ १३ अष्टघ्नः १०७८५ ४४ अस्मात् षष्टि
हृतांशाः १७९ खवाग्निभागेन राशिः एवं राश्यंशकलादिको रविर्जातः ५ २९ ४५ ४४ ११

१३

मूलपुस्तकक्रमोयं उदाहरणक्रमस्त्वत्र अयेद्दष्टव्यं ऋक्षाधिकाद्युगशरात् ५४ पतितोभवेत्तोगे
लौक्रियादिवनिज्ञादिषु सौम्ययाम्यौ अर्कोनहीनचन्द्राद्दीन स्तिथयः खनंदै ९० पंचाब्धिभिस्त
करणानि ववादिकानि १२ रूपोनिता असितभूतदलाद्धतीयाच्चत्वारितानि शकुनिप्रभृती
निनित्यं शेषोनभाजकनभोंगर्भ९० गुणाद्वासागत्यंतरेण घटिकाद्यातलब्धमृक्षे १३
शेषाब्धतो १०० नखरस्ररप्रस्वभुक्तिलब्धोद्दे देवं रवींदुयुतितश्चभवंतियोगाः शारत्राब्धिकाः
शिवशतं ११०० सहिता स्त्रिगुण्या भक्ताः शतहृय २०० मितो अयनांशकाः स्युः १४ ऋक्षा
धिकायुगशारासनिताभवेयुस्तस्याधिकायुगशरैः खशेषिताश्च मेषार्कसायनक्रमितांगुल
स्यशंकोः प्रभार्द्धदिवसेगदिताक्षभासा १५ गुणपादशा १० ष्ट ८ दशाभिः १० गुणभाजितास्या
खंडाश्चरास्युरयनांशयुतस्य भानोः दोराशिसंमितलवाद्गुणकाप्तगुण्यास्त्रिशाल्लवैश्च

१३

म्ये

रफलगनि भवंतियुक्ताः १६ युक्तोनिताश्चरपलैश्चारचंद्रनाउयः सोदिवानिशिदलंविप
रीतमन्यत् भानोः फलं भवि हंतं रविवर्द्धनर्ण चंद्रेगतिश्चरपलैर्गुणिताथलाप्ता ७७ षष्ट्यावि
भक्तकलिकाः स्वचरेधनर्णंकार्यंतुलाक्रियमुखादिगते दिनेत्रो उदाहरणं उदाहरणक्रमो
यपुस्तके अयनांशानयनमाह शास्त्राब्दकाइति शोस्त्राब्दाः ५ शिवशेतेः सहिताः
११०५ त्रिशगुणिताः ३३१५ हिशतेः २०० भक्तोलब्धा अयनांशाः स्युः १६ २४ एतेयदा
क्षा२७धिकाः स्युः तदा युगशाराः ५४ शाज्याः युगशारादधिकायुगशारेः शोधिताः कार्याः मेषादि
षड्भः सौम्योगोलः तुलादिषड्भोयाम्योगोलः एवं क्रियादिव निजादिषु सौम्ययाम्यगोलोभवे
त् १२ विषुवतीचरपलदिनराशिज्ञानमाह मेषार्केति उदाहरणं यस्मिन्दिने सायनः सू
र्यः मेषगतो भवति तस्मिन्दिने द्वादशांगुलशंकोर्मध्यान्हछाया भवति साछायाविषुवतीकथि

१४

ना अक्षभाचकथिताः अस्मिन्देशे गदायां विषुवती छाया ४ । २२ इयं सायनस्यार्कक्रमेणाद
ज्या १० ५९ ८ दज्या १० मिर्गुण्या अंत्यागुणेन भाजिता एवं त्रयः चरखंडाः स्युः ४५ ३६ १५ अथ
नांशाः १६ ३४ युतस्यरास्यत्वादि ५ । २८ ४५ ४४ भानोः ११३ अस्या ६ १६ १८ ४४ दोः भु
जः ० १६ १८ ४४ तस्यराशि ० शून्यं तन्मितं तन्मितखंडाः २ युतः ० शेषालवकांशाः १६ १८
४४ भोग्यखंडेन ४५ गुण्याः यदा शून्यखंडकाले भुक्ततदाखवाप्ति २ भोगेल्लब्धखंडाः २४ युताः
२४ एतानि चरपलानि भवंति एते श्चरपलेः शारचंद्र १५ नाड्यः एकयुताः १५ २४ एकत्रोनि
ताः १४ ३६ सौम्यगोलक्रमेण दिनदलं रात्रिदलं च अन्यत्र अस्मिन् याम्यगोले दिनरात्रिद
लं विपरीतं अथ याम्यगोले दिनरात्रिदलं विपरीतं अथ याम्यगोले दिनदलं १४ ३६ रात्रिदलं
१५ २४ १४ चरसंस्कारमाह भानोः फलमिति उदाहरणं भानुफले १८० भैर्वितं ०

१४

४० एतच्चंद्रेऽर्कणं सूर्यग्रहणत्वात् ग्रहाणांगतिः चरपलैर्गुणिता तत्र सूर्यस्यस्पष्टागतिः ० २८
चरपलैः २८ गुणिता ७८ षष्ट्या भक्ता विकलाः १ रवचरसूर्य १३७८ १३ धनं १३७८ १६ तुला दि
स्थितेसूर्येसति यदि मेषादिषट्कस्थितः सायनः सूर्यो भवति तदा एताः विकलाः क्षयं तथा चंद्रस्य
गतिः २०६ ४४ चरपलैः २७ गुणिता ५५६१ षष्ट्या ६० विहृताः विकलाः ४२ चंद्रे धनं १३२८ २८
अयं चरसंस्कारः भौमादिष्वप्येवं तथाचस्वनीत भानोः फलं मेषादिषड्राशिविपर्ययं तुलादिषड्रा
शिपर्ययं चरपलानि सूर्यादिषु क्रमेणानि धनानि सुः ३ हतं ० ४० चंद्रे १३२८ २८ अर्कांशस्पष्टचं
द्रः १३२८ ४८ १५ तिथिकरणयोगानयनं द्वाभ्यां अर्केति उदाहरणं अर्कण १३७८ १६ ही
नात्मशा दिनः २६८० ३२ खनंदैः ८० लब्धा २८ गतास्तिथयः वर्तमानामावास्या ३० तस्मात् अ
र्कणहीनत्वादिनः चोषात् २६८० ३२ पंचाब्धिभिः ४५ लब्धं ५८ सप्तभक्तो षिता निबवादिकानि कर

णानिरूपोनितानिगतगम्यास्युः सर्वत्रैवक्रिया अत्रविशेषमाह अत्रासिततिथिश्चतुर्द
शीतस्य द्वितीयामारभ्यचत्वारि शकुनिप्रभृतिन्निशकुनिचतुष्पदनागकिंस्तुघ्नसंज्ञितानि
तस्मादत्रामावास्याद्वितीयभागेनागकरणं १६ शेषानइति उदाहरणं अत्रखनंदनक्षत्रो
नैला ७० ३२ भाजकोनितः १९ २८ नभोगेन ६० गुणितः ११६८ अस्माच्चंद्रगतिः
१०६ ४४ सूर्यगत्यंतरेण ९९ १६ भजेल्ल आसासिथिघटिकाः जातः ११ ४६ पंचा
शाहृत करणे शेषः २५ ३२ भाजके ४५ ऊनः शेषः १९ २८ षष्ठि ६० गुणः ११६८ च
द्रसूर्यगत्यंतरेण ९९ १६ लब्धाकरणघटिकाः ११ ४६ चंद्रात् १३२८ ४८ शात १००
लब्धं १३ गतनक्षत्रं चतुर्दशाचित्रा शेषात् २८ ४८ शालोनितात् ७१ १२ स्वरसगु
णितात् ४२७२ चंद्रगत्या १०६ ४४ लब्धाचित्रानक्षत्रघटिकाजाताः ४० १२ एवर

लो॰भा॰

वीदुगुणितः उदाहरणं रविः १२४८ १६ इंदोः ९३२८ ४८ योगः २६७ ४ अस्मात् ज्ञाता १००
लब्धषट्त्रिंशो ऐन्द्रो योगः आगतः वर्त्तमानो वैधृतिः तस्य नक्षत्रचक्रात् शेषं २७ ४ तेन
षष्ठि ६० घ्ना १६२ ६ चंद्रसूर्यगतियोगेन ११४ १२ हृता सा घटिका जाता १२ ३ ७ अथ भौ
मादीनां स्पष्टीकरणं माह उदाहरणं मध्यो रविर्द्विगुणितो ग्रहो लोमगुणो मध्याय
लोगुरुकुजार्कगुवां चलोच्चं १८ केंद्रं तुलादि चपलं भगणाद्द्विनाध्यं १८०० तस्याधिकं
नग ज्ञातात् ७२० गुणितं चतुर्भिः खेडाज्ञातेन १०० गुणितां नरशेषका च्चलब्धा ज्ञातेन हि
युतो नितकोः फलं स्यात् १९ नवाग्नी ३९ गजाब्धी ७८ शरेषा ११५ नवेंद्रा १४९ द्विपाब्धा
७८ इभांकेंद्रा १९८ येनदेवा १९८ कुजेह्यंकभू १९२ स्व्यष्टभू १८३ रंध्रभूपा १६९ मरुद्भू १४९
द्विभूपा १२२ ल्याष्टौ ८७ रसाब्धी ४६ २० बुधेन ३७ द्विबाणा ५२ नाराभ्यो ३५ युग्मको

31

लो॰भा॰

गुरुत्वाने श्वस्यो: समस्त्रातात् अधिकं चतु॰भिर्गुण्यं तयोर्नवरखंडकत्वान् एषां पंचदश १५
खंडकास्तेषामेव चतुर्भिः गुण्यं तत्त्वस्य थ: १८ तस्मात् व्रातेन १०० लब्धौ: खंडाग्रास्या:
त्रोषांकात् पुनः भोग्यखंडांतरेण गुणित व्रातलब्धेन युनिता: त्व ब्धखंडफलं तत्राग्रिम खंड
अधिके तति युता: ऊने ऊना: मध्यमे ग्रहे प्रथमे चोच्चफलस्यार्धं संस्कार्यं तस्मान्मंदफल
मानीय चोच्चार्धं संस्कृते ग्रहे संस्कुर्यात् मंदफलस्यार्धं संस्कार्यं तस्माद्धि फलसंस्कृत
लग्रहात् पुनरपि मंदफलमानीय: सम्पूर्णफलं प्रथम मध्यमे ग्रहे संस्कुर्यात् तस्मात् चोच्चफल
मानीय पूर्णफलम ध्यमे संपूर्णफलसंस्कृतग्रहे संस्कार्यं अत्रोदाहरणं मध्यमो भौम:
७।२९।१४ भौमस्य चोच्चं ५।०।१।२० मंदोच्चं ४।२।१ प्रथम फलार्धं भौमस्य चोच्चं ९।०।९।२०
ग्रहे लग्न मध्यम भौमेन ७।४।१४ रहितं शेषं चोच्चकेंद्रं ९।१६।० ६ इयं तुलादि केंद्रं भगणागत

५

१८०० त्रिज्यो ध्यत्रिशिष्टं ८३९ ५४ अस्यगतत्वातादधिकत्वान्नगतौते: ७०० त्रोषायं १३९
५४ सचतुर्भिर्गुणं ५५९ ३६ खंडा: त्रातेनेति सप्तत्रातस्यसमेव ७ खंडा: प्राप्ता: त
त्र भौमस्य द्वादशमो खंड भुक्तं १२२ भोग्य: ८१ अनयोरंतरगुणं ३५ त्रोषो ५९ ३६ गुणित:
२०८६ शताल्लब्धा २० ५१ भुक्त खंड १२२ त्रदणं १०१ ९ भोग्य खंड मस्य भुक्त: खंडम
ध्येपतित्वात इदं भौमस्य शीघ्रफलं १०६ २ प्रथमफलत्वात् दले ५० ३४ इदं तु लाभ
केंद्रत्वान्मध्यमे भौमे ७४९ १४ ऋणं जातं एकफलसंस्कृतो भौम: १६९८ ४० अनेन
यतल १६९८ ४० भौमस्य मंदोच्च १५१ रहितं विशिष्टं ३५२ २० केंद्रमिदं त्रिराश्यधिकं ४५०
अर्द्धषड्राशौ ९०० विहीनं शेष भुज: १४७ ४० भौमादिमंदफले श्रेन्यचारा ५० मखंडाद
त्यक्तत्वात् अस्मात् भुजात् १४७ ४० श्रेन्यचारा ५० द्वितीयो रविधुयुगा ०१ इतिज्या

५

खंडकः शेषा७ ४० अग६ ० गतः ४१ अनयोरंतरेण १९ गुणितः ९०५ ६० अस्मात्भू
न्यहारा ५० सेन १८ ६ भुक्तखंडो ४१ युतः ५९ ६ भुजज्याजाताइयं भौमपरेण ५० गुणिता
२९५५ भौमस्य भुजपूर्वार्द्धहार ४० हतेन ७३ ५२ हीना २८८१ ८ जातनलब्धा २८ ४८ द्वंदं भौ
मस्य मांद्य फलद्वितीय फलतो ६ १४ २४ एकफल संस्कृते भौमे १९९८ ४० धनं मेषादि केंद्रत्वात्
जातद्वि फलो भौमः ७ १३ ४ अस्माद्दनेनैव प्रकारेण पूर्वमांद्यं फलं याह्यं तत्रग्रहः ७ १३ ४
मंदोच्चं ४ ५१ केंद्र ७ ७ ५६ भुजः १६२ ४ भुजज्या ६४ ६ भोग्यं ७ फलं ३१ १५ मेषादि केंद्रत्वा
लमध्यमे भौमे ७ ४९ १४ धनं ७ ८० २९ जातस्त्रिफलो भौमः अयमेव ग्रहः ७ ८० २९ शी
घ्रोच्चं ९ ० ९ २० केंद्रं ६ २८ ५१ प्रथमशीघ्र फलाभ्यासः खंडस्त्रयोदशाम ७ भोग्यः ४१
फलं ५२ १९ त्रिफले भौमे ७ ८ ० २९ ऋणं जातस्पष्टो भौमः ७ २८ १० एवं बुधादयोपि

बुधोग्रहः ६०६ २० शीघ्रोच्चं १३८५ २४ मंदोच्चं ११०२ प्रथमद्वितीयफलयोरुदाहरणं
न लिखितं गत्याद्यानयनार्थं तृतीयचतुर्थफलयोः किंचित्किंचिल्लिख्यते बुधस्य तृती
यमांद्यकेंद्रं १३७ भुजः भोग्यखंडः १९ फलं धनं १० ७ ८ चतुर्थशीघ्रकेंद्रं ४६५ भोग्यखंड ११
फलं धनं १०१ १२ स्पष्टोबुधः १०२१ ८ मध्योगुरुः ६३८ ४५ तृतीयमांद्यकेंद्रं ७२४ ७ भु
जौ ७५ ५२ ऋणं फलं ६ ४६ भोग्यं २० चतुर्थकेंद्रं ७११ २० ऋणं फलं ३ ३७ भोग्य १९ यदा
खंडो न लभ्यते तदा प्रथमखंड एव भोग्यः स्पष्टोगुरुः ६२८ २२ शुक्रग्रहो मध्यमः ६०२ २०
तृतीयमांद्यकेंद्रं १२०५ ६ भुजः ३०५ फलं ऋणं ७ ५८ भोग्यं ६ चतुर्थशीघ्रकेंद्रं ४६० ५२
फलं धनं १८१ ४२ भोग्यं ३४ स्पष्टः शुक्रः १०८२ ४ मध्यः शनिः १४०० ५२ तृतीयमांद्यकें
द्रं ६११ २६ भुजः १८८ २१ ऋणं फलं २२ ३० भोग्यं ७ चतुर्थशीघ्रकेंद्रं १३३ फलं ऋणं

१८

ले॰भा॰

३१ ४० भोग्यं १ स्पष्टः शनिः १३४५ ४२ १९ नवाग्नी स्याद्यः प्रकरार्थ एवनवैव खंडाः आर्किगु
र्वोः ससशनादधिकं केंद्रचतुर्निर्गुणयेत् अत एव तयोर्नवैव खंडाः श्लोकाः २० २१ २२ २३
भोमस्यस्पष्ट खंडासे शेषश्च खशरा ५० धिकः शतो नस्त्रिगुणः खाक्षै ५० रास शेषस्तु षष्ठके
२४ भोमस्यषष्ठ खंडेति शेषमाह भोम खंडे प्रासे सति शेषात् खबाक ९० खशराङ्गनः स्यात्
त्रिगुणः खाक्षैर्लब्धेन षष्ठांकः खंडो युक्तः कार्यः खशरादधिकश्चेत् तदा शतो नत्रिगुणः
खाक्षाप्तके ५० न युक्तः षष्ठोकार्यः २४ ग्रसाधान यनेमाह शेषघ्नी विहीना स्फुट मंद
भुक्त्या गुण्यास्व भोग्येन शतेन भक्ता वेदघ्न केंद्रस्य च वेदगुण्या भुक्तो धनर्णाधिकहीन
खंडात् २५ यदा विहीना विपरीत शेष्याशेषा भवेद्वक्रगतिः खगानां द्विनेदिनसार खचरे
प्रयोज्या खंडांतरं यावदुपैतिनान्यत् २६ वक्रादिवक्रा विकला तिमंदा मंदा समाशी घ्रत

37

लो॰भा॰ मंदभुक्तिर्जाता बुधस्यांत्योग्री २० ५८ स्फुटमंदभुक्त्या ४ ३५ हीना १५ ५३ चलाग्रखंडभो
ग्येन ११ गुण्या १७४ ४३ शतेन १०० भक्ता १ ४४ भुक्तौ धनं ८ ३५ बुधस्य स्पष्टा गतिर्जाता ६
१८ गुरोर्भोग्यं २० फलं ० २ ऋणं स्फुटमंदभुक्तिः ० ३३ चलाग्रखंडभोग्य १८ फलं ० ४३ धनं
१६ गुरोः स्पष्टभुक्तिः एवं शुक्रस्य स्फुटमंदभुक्तिः ४ ५८ स्फुटगतिः ६० शनेर्मंदगतिः ०
२ स्फुटगतिः ० ११ एवं गतिर्दिने दिने ग्रहे प्रयोज्या यावद्ग्रहः अपरखंडं न प्राप्नोति अपरखंडे
प्राप्ते नैव गतिः विकला विभुक्त इति अग्रिमसंख्यासमा चेत् प्रतरांत्योग्री इत्यष्टधा प्रकारे खेट
गतिर्भवति चक्रोनिताः पातभगुः न विधुते गोः कियंलो यस्य सः भगुः राहुः स एव षड्भैः वि
रवितः केतवः स्युः पातः १८२ १३ चक्रे ३७०० ऊनः राहुः २५७ ४७ अयं षड्भयुतः १३५० युतः
११६७ ४७ केतुः श्लोकाः ३७ तत्कालिकानयनमाह याः स्युः पूर्वापरा नाड्यो भुक्तिघ्नाः

रातिशैघ्री इत्यष्टवारेवंगतिस्तु जातको नितोयु २७०० त्रिरिवन: सषड्: १३५० २७
त्रैघ्राति पूर्वानीतस्फुमंदभुक्तया भौमादीनां शैघ्रीगतिर्विहीनाकार्या तद्यथा भौमस्य भोग्य:
७ भुजस्य खंडस्य स्वयुगे ०० नक्ते लब्ध: २५ इदं भौमस्य मध्यमगतो २ ३७ ककादिकेंद्रत्वा
द्धने ० २ इदं भौमस्य स्फुटमंदभुक्ति: अनया भौमस्य ३ २ शैघ्रीगति: ४ ५६ हीना १
५४ इयं भौमकेंद्रगतिर्जाता साच भौमशीघ्रभोग्यखंडेन ४१ गुणिता ७१ ५४ वेदघ्नकेंद्रस्य
यंगतिचपुनर्वेदगुणिता ३११ ३६ शतेन भक्ता ० ७ इयं स्फुटमंदभुक्तौ ३ २ अग्रिमखंड
स्याधिकत्वात् धनाग्रिमखंडाहीन: तस्मादृणं इयं १ ७ भुक्तौ ३ २ हीना भवति
तदाविपरीत शोधाच्छोषा भौमस्य वक्रागतिर्जाता ० ५ एवं बुधस्य भुजज्याखंड भोग्यं १९
त्रिबाणै: ५३ हृतं ० २१ मृगादिकेंद्रत्वात् बुधस्य भुक्तौ ४ ५६ ऋणा ४ ३५ बुधस्य स्फुट

लो॰भा॰

षष्ठि ६० भक्ताः लब्धलिप्ताभिरूनो युग्मलस्ताल्कालिको भवेत् २८ पाः पूर्वपराना

उयः स्पुः ताः ग्रहगुणिघ्ना:	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५
मं॰	३५	७८	११५	१४९	[illegible]	१५८	[illegible]	१८८	१६३	१५५	१४९	१२२	८१	४६	०
बु॰	३७	५२	७५	६४	१०५	९७	९१	८४	७५	६६	५५	४२	२९	१५	०
गु॰	१६	३२	४५	५३	५८	५४	४३	२४	०	०	०	०	०	०	०
शु॰	४२	८३	१२३	१६१	१९५	[illegible]	२३२	२२८	२२१	२०९	१९०	१६१	१२०	६४	०
श॰	१०	१६	२६	३१	३२	२६	२२	१२	०	०	०	०	०	०	०

पश्चात्षष्टि ६० भाजिताः लब्धायालिप्तास्ताभिरूनो युक्तश्च ग्रहस्तात्कालिको भवेत् तत्र अंशादौ त्रिशांशायां पारावेपूर्वना उयः १० सूर्यगत्या ७ २८ गुणिताः ७४ ४०

षष्टि ६० भाजिताः कलाः १ १४ आभिः स्पष्टः सूर्यः १३४८ १६ ऊनितः जातस्तात्का
लिको रविः १३४७ २१ एवं पूर्वमपि ॥ अपरदिनगमनाद्यः १० गुणिता षष्टिभाजिताः
ताभिः १ १४ युक्तस्तात्कालिको रविः १३४९ । ३० एवमपरमपि ॥ इदानीं राश्यंतरवक्र
मार्गास्तोदयदिनज्ञानमाह ॥ खेटराश्यंतरभाज्यं भुक्त्याप्तलब्धदिनोदयः केंद्रांतरकेंद्र
गत्या वक्रास्तदिग्गतस्य च ॥ २९ ॥ खेटेति ॥ तात्कालिकखेटस्य राश्योश्चांतरं भुक्त्या भ
क्तं लब्धं दिनाद्यः स्युः ॥ तत्र खेटो रविः १३४८ १६ राशिः षट् १३५० तयोरंतरं १ ४४ स्
सूर्यभुक्त्या ७ २८ भक्ते लब्धं कन्यास्थितरवेः ८ द्यः ० । १३ । ५५ स्युः एवमन्येष्वपि ॥ चक्रा
स्तादिगतस्य केंद्रांतरं केंद्रगत्या भाज्यं वक्रास्तदिनगतस्य च पुनः दिनाद्यः स्युः ॥ तत्र
भौमस्य तात्कालिकं चतुर्थवक्रकेंद्रं ६ २८ । ५१ मार्गकेंद्रं ६ ८५ अनयोरंतरं ५६ । ९ केंद्र

A1

लो॰भा॰

केंद्रगत्या १ ५५ नक्रं लब्धं भौमस्य मार्गादिनादयः स्युः २९।४ तथा च गुरोस्तात्कालिकं केंद्र ।।। २० अस्य केंद्र ४३० अनयोरंतरं ७ २० गुरोः केंद्रगत्या ४ २२ भाग्यलब्धं दिनादयः स्युः १० २४ गुरोरस्तस्यात् २९ भौमाद्यस्तोदय केंद्रानयनमाह प्राच्यां भौमउदेति पूर्णमनुभिः १४० ततस्तद्वदिग्भि १०२५ गुरुर्व्योमाब्धे ७० रविवानाः शौरेंदुनवभि ११५ सौरिश्च पंचाद्रिभिः ८५ पश्चान्नेत्रः खवनाराशिभिः २५० चंद्रपुत्रः रवार्केस्तु केंद्रांशार्कै रन्येश्च कविसौधितैः पुनरमीभिस्तेव्रजत्यस्ततां २० प्राच्यामिति अन्येः केंद्रांके चतुर्थ त्रिगोधृकेंद्रगतांकैः पूर्णमनुभिः भौमः प्राच्यांदिशिउदेति १४० तत्वदिग्भिः १०२५ गुः व्योमाब्धे गुरुः ७० शौरेंदुनवभिः ११५ शुक्रः पंचाद्रिभिः ८५ शनिः एते प्राच्यां दिशिउदयगाः खवनाराशिभिः २५० बुधः पश्चिमे रवार्कैः १२० शुक्रः पश्चिमेउदेति अनीभि

रंके:१८००विश्लोधितैः पुनरस्तगताः उदयविपरीता अस्तंताव्रजंतितत्रपश्चिमेऽस्तगाः
भौमस्य१६६०बुधस्य११५गुरो:७२०शुक्रस्य८८५शनि७१५अथपूर्वेअस्तांशाः बुधस्य
१५५०शुक्रस्य१६८०श्लोकाः२०अथवक्रमार्गकेंद्रांकाश्चक्रदिनादिमाः वक्रंगछ
तिभूमिजस्त्रिथिगजे८१५स्तत्वाद्रिभि७२५ज्ञोगुरस्तत्वांग६२५न्भृगुजस्तत्वव
तिभूमिजस्त्रिथिगजे८१५... विशुद्धेशोधितेरथद्दिनैर्वेदाद्रिभिः
स्तु८२५मःपंचांगबाणेः५६५शनिः मार्गाचक्र१८००विशुद्धेशोधितेरथद्दिनैर्वेदाद्रिभिः
७४त्र्यंब्धिभे२२नागचन्द्रो१९८रनिले४९वियन्मनुमिते१४०भौमादयोमीक्रमात ३१
वक्रमिति भूमिजस्तिथिगजे८१५वक्रंगछतिबुधः७२५गुरुः६२५शुक्रः८२५शनिः
५६५मार्गगछति मंगलः९८५बुधः७७५बृहस्पतिः१७५शुक्रः९७५शनि१२३५

चक्रदिनानि भौमस्य ७४ बुधस्य २३ गुरोः ११८ शुक्रस्य ४२ शनेः १४० श्लोक ३१
भौमाद्येरस्तव्यामार्कादिस्यादयो वासरा ज्ञेयाः व्योमार्का १२० दस्रानाः ३२ रदाः भुजनगैः ७२
व्योमाब्धयः ४० यो वासरा भौमाद्यास्ते अथो नृपाः १६ विधुभुवः शुक्रस्य द्विवक्रिणः
नागाश्वाः ७८ष्टनवाः ९८ क्षभाष्टगुणिताहीनान्विताः स्तस्तमभानां च रावितमुनिः कल
त्राभूरस्तोदययोग इति ३२ तत्र भौमारस्ते व्योमार्काः १२० बुधस्य दस्रानाः ३२ गुरोः रद ३२
शुक्रस्य भुजनगाः ७२ शनेर्व्योमाब्धयः ४० अथानंतरं वक्रिणः विधुभुवः वक्रगतस्य
बुधस्य नृपाः १६ वक्रिणः शुक्रस्य दिक् १० अक्षभापलभा अष्ट ८ गुणिता नागाश्वैः ७८
हीना अष्टनवैः ९८ युक्तास्तस्तमेऽंशे रवौ गते भानौ सति अगस्त्यः क्रमेण अस्तोदययोग इति
इति लोकभास्करे सोदाहरणः स्पष्टाधिकारः अथ छायाधिकारो
३२ व्योरव्यायते राशयं च रा क्रांद्गतरवेट्विधानमथ वक्षे भुजा द्वादश भागमिते नद्यां ज्या ४०

२३

